लीलावत्ती

नं० ८६०-घ

पत्राणि १०

१० पत्रे

नं० ८६०-घ
लीलावती (ज्योतिषम्)
पत्राणि १० (अपूर्णम्)

एवमाद्यानंत्यं पाटीसूत्रोपमं वीजं गूढमित्यवभासते नास्ति गूढममूढानां नैव षोढेत्यनेक
धा ५५ अथ गुणघ्नमूलोनयुतराशेर्जातस्यादिकस्यानयने करणसूत्रं वृत्तद्वयं गुणघ्नमूलोन
युतस्य राशेर्दृष्टस्य युक्तस्य गुणार्धकृत्या मूलं गुणार्धेन युतं विहीनं वर्गीकृतं प्रष्टुरभीष्टरा
स्यात शिः ५६ यदा लवैश्चोनयुतः स राशिरेकेन भागोनयुतेन भक्त्वा दृश्यं तथा मूलगुणं च ताभ्यां
साध्यस्ततः प्राक्तवदेव राशिः ५६ अत्र योराशिः स्वमूलेन केनचिद्गुणितेन ऊनो दृष्टस्तद्रा
शेर्दृष्टस्य मूलगुणकार्धकृत्या युक्तस्य यत्पदं तत् मूलगुणकार्धेन युतं कार्यं यदि गुणघ्नमू
लयुतो दृष्ट [illegible] राशिः तदा विहीनं कार्यं तस्य वर्गो राशिः स्यादित्यर्थः अथ मूलोनदृष्टे
तावदुदाहरणं बाले मरालकुलमूलदलानि सप्त तीरे विलासभरमन्थरगान्यपश्यं कुर्वच्च
केलिकलहं कलहंसयुग्मं शेषं जले वद मरालकुलप्रमाणं ५८ न्यासः मूलगुणः ७/२ दृश्यं २

युक्तस्य दृश्यभक्तो वा

११ अस्य गुणार्द्ध ७/२ कृत्या ४९/४ ८१/४ मूलं गुणार्द्धेन ७/२ युतं वा ९/४ अपवर्जितं ४ वर्गीकृतं जातं हंसकुल
मानं १६ अथ मूलयुते दृश्ये उदाहरणं स्वपदैर्नवभिर्युक्तः स्याच्चत्वारिंशताधिकं शतद्वादश
कं विद्वन कः स राशिर्निगद्यतां ५९ न्यासः मू॰ गु॰ ९ दृश्यं १२४० उक्तप्रकारेण जातो राशिः ९६१
अथान्यदुदाहरणं यातं हंसकुलस्य मूलदशकं मेघागमे मानसं प्रोड्डीय स्थलपद्मिनीवन
मगाद्दष्टांशकोम्भस्तटात् बाले बालमृणालशालिनि जले केलिक्रियालालसं दृष्टं हंसयु
गत्रयं च सकलां यूथस्य संख्यां वद ६० न्यासः मू॰ गु॰ १० भाग १/८ दृश्यं ६ यदा लवैश्चोनयुत
इत्यादिना एकेन भागोनेन ७/८ मूलगुणं दृश्यं च भक्तं जातं मूलगुणकं ८०/७ दृश्यं च ४८/७ आभ्यां
गुणघ्नमूलोनयुतस्य राशेरित्यादिना जातं हंसकुलमानं १४४ अथान्यदुदाहरणं पार्थः ११
कर्णवधाय मार्गणगणं क्रुद्धो रणे संदधे तस्यार्द्धेन निवार्य तच्छरगणं मूलैश्चतुर्भिर्हं

यान् शल्यं षड्भिरथेषुभिस्त्रिभिरपि छत्रं ध्वजं कार्मुकं चिच्छेदास्य शिरः शरेण कति ते यान
र्जुनः संदधे ६१ न्यासः मूलं· गुण ४ भाग १/२ दृश्यं १० यदा लवैश्चोनयुत इत्यादिना जातं
मूल· गु· ८ दृश्यं २० अतउक्तकरणेन जातं बाणगणमानं १०० अथान्यदुदाहरणं अलिकुलदल
२८ मूलं मालतीं यातमष्टौ निखिलनवमभागाश्चालिनी भृङ्गमेकं निशि परिमललुब्धं पद्ममध्ये निरु
द्धं प्रतिरणति रणन्तं ब्रूहि कान्तेऽलिसंख्यां ६२ न्यासः अत्र किल राशिनवांशाष्टकं राश्यर्द्धमूलं
च राशेः ऋणं रूपद्वयं दृश्यं वाञ्छितं राश्यर्द्धस्य भवतीति तथा न्यासः मू· गु· १/२ दृश्यं १ राश्यर्द्धस्यां
शो राश्यंशस्यार्द्धं भवतीति स एव भागो न्यस्तः ६ अतो यदा लवैरित्यादिना करणेन जातं मूल· गु ३
दृश्यं ९ आभ्यां प्राग्वज्जातं मलिकुलमानं दलमानं ३६ द्विगुणमलिकुलमानं ७२ अथान्यदुदाह
रणं यो राशिरष्टादशभिः स्वमूलैः राशित्रिभागेन समन्वितश्च जातं शतद्वादशकं तमाशु जा

नीहि पादांशयुतानि तानि चेत् २६ न्यासः मू० गु० १० भा २ दृश्यं १२०० अत्र यदा लवैरित्यादिकरणेन जातं
४ मूलगुणे ३ २ दृश्यं ९०० अत उक्तकरणेन जातो राशिः ५७६ । अथ त्रैराशिककरणे सूत्रं प्रमाणमि
च्छा च समानजाती आद्यंतयोस्तत्फलमन्यजाति मध्ये तदिच्छाहतमाद्यहृत्स्यादिच्छाफलं व्यस्त
विधिर्विलोमे २७ उदाहरणं कुंकुमस्य सदलं पलद्वयं निष्कसप्तमलवैस्त्रिभिर्यदि प्राप्यते सपदि
मे वणिग्वर ब्रूहि निष्कनवकेन तत्कियत् २८ न्यासः ३ । ५ । ९ लब्धानि कुंकुमपलानि ५ २ प्रकृष्टक
र्पूरपलत्रिषष्ट्या चेल्लभ्यते निष्कचतुष्कयुक्तं शतं तदा द्वादशभिः सपादैः पलैः किमाचक्ष्व सखे विचिंत्य
२९ न्यासः ६३ । १०४ । ४९ लब्धानि निष्काः २० द्रम्माः ३ पणाः ८ काकिण्यः ३ वराटकाः १० वराटकभागाः ३
अथोदाहरणं द्रम्मद्वयेन साष्टांशा शालितंदुलखारिका । लभ्या चेत्पणसप्तत्या तत्किं सपादिकथ्य

तां ३० अत्रप्रमाणेछयोः स्वजात्यापवर्तीकृतस्य इच्छाद्वयस्य न्यासः ३२।५/२।७० लब्धे खार्यौ २ द्रो
णाः ७ आढकः १ प्रस्थौ २ अथव्यस्तत्रैराशिके सूत्रं इछावृद्धौ फले ह्रासे वृद्धिः फलस्य च व्यस्तंत्रै ह्रासो
राशिकं तत्र ज्ञेयं गणितकोविदैः २१ जीवानां वयसो मौल्ये तौल्ये वर्णस्य हेमनि भागहारे च रा
शीनां व्यस्तं त्रैराशिकं विदुः २२ उदाहरणं प्राप्नोति चेत्षोडशवत्सरा स्त्री द्वात्रिंशतं विंशति
वत्सराकिं द्विधूर्वहो निष्कचतुष्कमुक्षा प्राप्नोति धूःषट्कवहस्तदाकिं २३ न्यासः १६।३२।२०
लब्धं फलं २५ ३/५ द्वितीयोदाहरणे न्यासः २।४।६ लब्धं फलं २/२ उदाहरणं दशवर्णं सुवर्णं
चेद्गद्याणकमवाप्यते निष्केण तिथिवर्णं तु तथावद्वा किं यन्मितं २४ न्यासः १०।१।१५ लब्धं
सुवर्णं २/२ उदाहरणं सप्ताढकेन मानेन राशौ सस्यस्य मापिते यदि मानशतं जातं तदा पञ्चा

१२ 13

ढकेनांकं २५ न्यासः ७।१००।५ लब्धं फलं २४० अथ पंचराशिकादौ करणसूत्रं वृत्तं पंच
सप्तनवराशिकादिकेष्वन्योन्यपक्षनयनं फलच्छिदां संविधाय बहुराशिजे वधे स्वल्पराशि
वधभाजिते फलं ३६ उदाहरणं मासे शतस्य यदि पंचकलांतरं स्यात् वर्षे गते भवति किं वद
षोडशानां कालं तथा कथय मूलकलांतराभ्यां मूलं धनं गणक कालफले विदित्वा ३७ न्या
सः १ १२ / १०० १६ / ५ उक्तकरणेन लब्धं कलांतरं ४ / ५ अथ कालज्ञानार्थं न्यासः १ / १०० / ५ १ / १६ / ४ / ५ लब्धा मासा
१२ अथ मूलधनज्ञानाय न्यासः १ / १०० / ५ १२ / ४ / ५ लब्धं मूलधनं १६ उदाहरणं सत्र्यंशमासेन शत
स्य चेत्स्यात्कलांतरं पंच सपंचमांशाः मासैस्त्रिभिः पंचलवाधिकैस्तैः सार्धद्विषष्टेः फल
मुच्यतां किं ३८ न्यासः १ १ १६ १०० / ३ ५ ५ ६२ २ लब्धं कलांतरं २९ / ५ अथ सप्तराशिकोदाहरणं विस्ता १२

रेत्रिकराः कराष्टकमिता दैर्घ्ये विस्तरात्र्यश्च चेद्रूपैरुत्कटपट्टसूत्रपट्टिका अष्टौ लभंते शतं दैर्घ्ये सा
र्द्धकरत्रयापरपटी हस्तार्द्धविस्तारिणी तादृक्किं लभते द्रुतं वद वणिग्वाणिज्यकं वेत्सि चेत् २९
न्यासः ३ ७ लब्धा निष्काः ० द्र० ७ प ९ का ९ ७ २ वराटकभागाः ३/१ अथ नवराशिकोदाहरणं पिंडे
येकमि ६ १ तांगुलाः किल चतुर्वर्गांगुला विस्तृतौ पट्टा दीर्घतया चतुर्दशकरास्त्रिंशल्लभंते श
तं एता ८ १ विस्तृतिदैर्घ्यपिंडमितयो येषां चतुर्वर्जिताः पट्टास्ते वद मे चतुर्दश सखे मूल्यं त
भंते कि १० ९ यत् ४० न्यासः १२ ८
१६ १२ लब्धं मूल्यं निष्काः १६ ३/१ अथैकादशराशिकोदाहरणं
पट्टा ये प्रथमोदितप्रमितयो ग १४ १० व्यूतिमात्रे स्थितास्तेषामानयनाय चेच्छकटैर्नाद्रम्मा
ष्टकं भाटकं अन्ये ये तदनंत ३० ०० रं निगदिता माने चतुर्वर्जितास्तेषां का भवतीह भाट
कमितिर्गव्यूतिषट्कं वद ४१ न्यासः लब्धा भाटकद्रम्माणां मितिः ८ अथ भांडप्रतिभांड

१४ केकरणस्सूत्रं तथैव भांडप्रतिभांडकेपि विधिर्विपर्यस्तहरांशमूले ४२ उदाहरणं द्रम्मेण ल
भ्यत इहाम्रफलत्रयं चेत्त्रिंशत्पणेनाविपणौ वरदाडिमानि आम्रैर्वदाशु दशभिः कति दाडिमानि
लभ्यानि चेद्विनिमयेन भवंति मित्र ४३ न्यासः [illegible] लब्धानि दाडिमानि १६ इति श्रीग
णितपाट्यां लीलावत्यां प्रकीर्णकाध्यायः ४ अथ मिश्रव्यवहारे सूत्रं प्रमाणकालेन हतं प्रमा
णं विमिश्रकालेन हतं फलं च स्वयोगभक्ते च पृथक्स्थिते ते मिश्राहते मूलकलांतरे स्तः १
यद्वेष्टकर्माख्यविधेस्तु मूलं मिश्राच्च्युतं तच्च कलांतरं स्यात् २ अत्रोद्देशकः पंचकेन शते
नाब्दे मूलं स्वं सकलांतरं सहस्रं चेत् पृथक् तत्र वद मूलकलांतरे ३ न्यासः [illegible] मूलध
नं ६२५ कलांतरं २ ३७५ अथवेष्टकर्मणा तद्यथा कल्पितं रूपमिष्टं [illegible] पंचसप्तनवराशि १४

कादिकेन्योन्येत्यादिना कृते पश्चादुद्देशकालापवदिष्टराशिरित्यादिना करणेन रूपस्य वर्षैक
लांतरं ३ तद्रूपयुतं ८ अनेनेष्टाहतं दृष्टं १००० भक्तं जातं मूलधनं ६२५ एतन्मिश्राच्च्युतं जातं
कलांतरं ३७५। करणसूत्रं अथ प्रमाणैर्गुणिताः स्वकालाव्यतीतकालघ्नफलोद्धृतास्ते
स्वयोगभक्ताश्च विमिश्रनिघ्नाः प्रयुक्तखंडानि पृथग्भवंति ॥ उद्देशकः यत्पंचकत्रिक
चतुष्कशतेन दत्तं खंडैस्त्रिभिर्गणकनिष्कशतं षडूनं मासेषु सप्तदशपंचसु तुल्यमाप्तं खंडत्रयेऽपि
स फ सफलं वद खंडसंख्यां ४ न्यासः [illegible] मिश्रधनं ९४ अत्र प्रमाणं १०० तेन गुणिताः स्वकालः
१०० व्यतीतकाल ७ न गुणितं फलं ५ जातं ३५ पंचभिरपवर्त्तितं ७ अनेन प्रकारेण सर्वेषां सम
छेदं कृत्वा योगः २२५ तेन च मिश्रानिघ्नाः परिवर्त्तितछेदलवेन २१/२२५ स्वयोगेन भक्ता २४।२८।४२

२५ खंडाः क्रमेण जाताः पंचसप्तनवशाणिकादिके त्वाद्भिना जातं सर्वेषां समकलांतरं च ५८ कर
15 णसूत्रं प्रक्षेपकामिश्रहताविभक्ताः प्रक्षेपयोगेन पृथक् फलानि ५ अत्रोद्देशकः प्रक्षेपकामि
श्रहताविभक्ताः प्रक्षेपयोगेन पृथक् फलानि अत्रोद्देशकः पंचाशदेकसहिता गणकाष्टषष्टिः
पंचोनिता नवतिरादिधनानि येषां प्राप्ता विमिश्रितधनैस्त्रिशती त्रिभिस्तैर्वाणिज्यतो वद विभ
ज्य धनानि तेषां ७ न्यासः ५१।६८।८५ मिश्रधनं ३०० प्रक्षेपकयोगः २०४ प्रक्षेपकामिश्रहताः १५३००
२०४००।२५५०० प्रक्षेपयोगेन २०४ भक्ते जातानि धनानि ७५।१००।१२५ एतान्यादिधनैरूनानि ला
भाः २४।३२।४० अथवा मिश्रधनमादिधनैक्योनं सर्वलाभयोगः ९६ अस्मिन् प्रक्षेपगुणिते प्र
क्षेपयोगभक्ते लाभः। ।करणसूत्रं भजेच्छिदोंशैरथ तैर्विमिश्रैः रूपं भजेत्स्यात् परिहस्तिका २५

लः उद्देशकः येनिर्झरा दिनादिनार्द्धतृतीयषष्ठैः संपूरयंति हि पृथक्पृथगेवमुक्ताः वापीं
यदा युगपदेव सखे विमुक्तास्ते केन वासरलवेन तदा वदाशु ० न्यासः छेदांशयोर्विभजेत् १।२
१।३।६ एषां योगेन १२ रूपं भजेत् न्यासः १२ १ छेदं लवं च परिवृत्त्येत्यादिना जातं १ १२ कलोल
ब्धः हरणकालो दिनांशः १ १२ करणसूत्रं पद्यैः स्वमूल्यानि भजेत्स्वभागैर्हत्वा तदैक्येन भजे
च तानि भागांश्च मिश्रेण धनेन हत्वा मूल्यानि पण्यानि यथाक्रमं स्युः ० अत्रोद्देशकः सा
र्धं तंदुलमानकत्रयमहो द्रम्मेण मानाष्टकं मुद्गानां च यदि त्रयोदशमिता एता वणिक्काकिणीः
आदायार्पय तंदुलांशयुगलं मुद्गैकभागान्वितं क्षिप्रं क्षिप्रभुजो व्रजेम हि यतः सार्थोऽग्रतो या
स्यति ० न्यासः भागो २ १ मिश्रधनं १३ ६४ अन्नमूल्ये ।। स्वभाग २ १ गुणिते पण्यैर्भागौ २ १ भक्ते

१६ जाते ४ ६ अनयोर्योगः २८ १६ भाजकः एते ४ ६ मिश्रधनेन हते ५२ ४८ १२ ५२ योगभक्ते जाते तंदुल
16 मुद्गमूल्ये ६ १२ एवं स्वभागौ मिश्रधनहतौ २६ ६८ १२ ६८ योगेन भक्ते जातौ तंदुलमुद्गभागौ २४ २४
अत्र तंदुलमूल्यं काकिण्यः २० वराटकाः १२ भागाश्च २ मुद्गमूल्यं काकिण्यौ २ वराटका ६ तद्भागाः
२ उद्देशकः कर्पूरस्य वरस्य निष्कयुगलेनैकं पलं प्राप्यते वैश्यानंदन चंदनस्य च पलं द्रम्मा
ष्टभागेन चेत् अष्टांशेन तथागुरोः पलदलं निष्केण मे देहि तान् भागैरेकनिष्कषोडशांशक
मितैर्धूपं चिकीर्षाम्यहं १० न्यासः पण्यानि १।१।१ मूल्यानि ३२।८।८ भागाः २ १ ६ मिश्रध
नेन निष्कमेकं षोडशगुणं जातो द्रम्माः १६ मूल्यानि स्वभागगुणितानि पण्यैर्भक्तानि जाता
नि ३२।२।१२ एतेषां योगः ४६ एते मिश्रगुणा जाताः ५१२।३२।१९२ योगभक्ता जातानि कर्पूरादि १६

मौल्यानि १२८।६।६ स्वभागेषु मिश्रेण हत्वा योगेन भक्तेषु जातानि पलानि ४ ६ ३ रत्नजा
तौकरणसूत्रं वृत्तं नरघ्नदानोनितरत्नशेषैरिष्टे हृते स्युः खलु मूल्यसंख्याः शेषैर्हृते शेषव
धे पृथक्स्थे रभिन्नमूल्यान्यथवा भवंति ११ अत्रोद्देशकः माणिक्याष्टकमिंद्रनीलदशकंमुक्ता
फलानां शतं सद्वज्राणि च पंचरत्नवणिजां येषां चतुर्णां धनं संगस्नेहवशेन ते निजधनाद्द
त्वैकमेकं मिथो जातास्तुल्यधनाः पृथग्वद सखे तद्रत्नमूल्यानि मे १२ न्यासः ८।१०।१००।५ न
र ४ गुणितं दानं जातं ४ अनेनोनितरत्नशेषाः क्रमेण ४।६।९६।१ एतैरिष्टे हृते रत्नमूल्यानि
स्युरिति तानि च यथा कथंचिदिष्टकल्पनादभिन्नानि अत्रेष्टं सुधिया कल्प्यते तत्कल्पितमि
ष्टं ९६ शेषैर्भक्तं पृथग्जातानि मूल्यानि २४।१६।१।९६ जाताः समधना २२२ प्रथमं ०त्रिदान

७ तः शेषं पतद्गुणिताः २४ जाता १२० अनेन २।८।१।९८ एषां योगेन २२२ युक्ताः ३२२ एवं सर्वे ज्ञातव्याः
अथवा शेषाणां वधेन २ः ४ पण्यकुशेषैर्भक्ते जातान्यभिन्नानि मोल्यानि ५७।६।३।८०।२।१२०४
समधने ५५८ एते द्रम्माः संभाव्यंते अथ सुवर्णगणिते सूत्रं सुवर्णवर्णाहतियोगराशेः स्व
र्णैक्यभक्ते कनकैक्यवर्णः वर्णो भवेच्छोधितहेमभक्ते वर्णोद्धृते शोधितहेमसंख्या १२ अ
त्रोद्देशकः विश्वार्करुद्रदशवर्णसुवर्णमाषा दिग्वेदलोचनयुगप्रमिताः क्रमेण आव
र्त्तितेषु वद तेषु सुवर्णवर्णस्तूर्णं सुवर्णगणितज्ञ वणिग्भवेत्कः १४ तेषां धनेन यदि विंश
ति रुक्ममाषाः स्युः षोडशद्रविणवर्णमिति स्वदाका चेच्छोधितं भवति षोडशवर्णहेम ते
विंशतिः कति तदा नु भवंति माषाः १५ न्यासः १३।१२।११।१० सुवर्णवर्णाहतिः १३०।४८।२२।४०। ७

एतेषां योगः २४० स्वर्णैक्येन २० भक्ते कनकैक्यवर्णो जातः १२ एते विशोधितास्तत्र षोडशमाषा भवंति तदा वर्णो १५ यदि षोडशवर्णं हेम तदा पंचदशमाषा भवंति ~~एक~~ एवं सर्वं स्वर्णैक्यान्निघ्नायुतिजातवर्णोत्सुवर्णतद्वर्णवधैक्यहीनात् अज्ञातवर्णाग्निजसं(ख्यया प्तमज्ञातवर्णस्य वदप्रमाणं २४ न्यासः २ ११ ६ जातं द्वादशवर्णं सुवर्णं १२ लब्धमज्ञातवर्णमानं १५ तौल्यज्ञानार्थं सूत्रं स्वर्णैक्यान्निघ्नायुतिजातवर्णः स्वर्णघ्नवर्णैक्यवियोजितोऽसौ अहेमवर्णाग्निजयोगवर्णविश्लेषभक्तो वदताग्निजं स्यात् १५ उदाहरणं दशेंदुवर्णगुणचंद्रमाषाः किंचित्तथा षोडशकस्य तेषां जातं युतौ द्वादशकं सुवर्णं कति हेमो षोडशवर्णमाषाः १६ न्यासः १० १४ १६ आवर्त्तितेजातवर्णः १२ लब्धं माषमानं

१८ स्वर्णमानङ्गानायसूत्रं साध्येनोनोनल्पवर्णैर्विधेयः साध्योवर्णः स्वल्पवर्णोनितश्च १६८
18 तुल्येशोषके स्वर्णमाने स्यातां स्वल्पानल्पयोर्वर्णयोस्त ७ अत्रोद्देशकः हाटकगुटिके षो
डशाद्दशवर्णेतद्युतौ सत्रिवजातं द्वादशवर्णसुवर्णं ब्रूहि तयोः स्वर्णमानेम १८ न्यासः १६
१० साध्यवर्णे १२ नोनल्पवर्णः ४ स्वर्णवर्णे १० नः साध्यवर्णः २ इष्टं तुल्ये १४ स्वल्पानल्प
योर्वर्णयोस्तेमाने ६ ८ करणसूत्रं एकाद्येकोत्तराश्चांका व्यस्ता भाज्याः क्रमात्स्थितैः परः
पूर्वेणसंगुणस्तत्परस्तत्परेण तु १९ एकद्वित्र्यादिभेदाः स्युरिदं साधारणं स्मृतं छंदश्चि
त्युत्तरे छंदस्युपयोगोस्यतद्विदां २० मूषावहनभेदादौ खंडमेरौ च शिल्पके वैद्यके रस
भेदीये तन्नोक्तं विस्तृतेर्भयात् २१ तत्र तावच्छंदश्चित्युत्तरे किंचिदुदाहरणम् १८

प्रस्तारे ऽभित्रगायत्र्याः स्युः पादव्यक्तयः कथं एकादिगुरवश्चाश्रुकति कतुच्यतां पथक्
२२ इह हि षडक्षरो गायत्रीचरणः अतः षडं तानामेकाद्येकोत्तराणां वास्तानाक्रमास्थितानां
चन्यासः ६/१ ५/२ ४/३ ५/२ ६/१ यथोक्तकरणेन लब्धा एकगुरवो व्यक्तयः ६ परः ५ पूर्वेणानेन ६ संगु
णए ३० छेदः रमक्तो लब्धा १५ द्विगुरवः अनेनैव त्रिगुरवः २० चतुर्गुरवः १५ पंचगुरवः ६ षड्गुरु
कः १ यथैव सर्वगुरुस्तथैकः सर्वलघुः १ एषामेको पादव्यक्तिमितिः ६४ एवं चतुश्चरणादम
संख्याकानं कान्विन्यस्य यथोक्तमेकादिगुरुभेदानानीय तदैकांसेकं कृत्वा जाता गायत्री
वृत्तव्यक्तिसंख्या १६७७७२१६ एवमुक्ताद्युत्कृतिपर्यंत छंदसां व्यक्तिमितिज्ञानं प्रोत्प
उदाहरणं एकाक्षराद्यिमरवावहनामितिमहो ब्रूहिमेभ्रमिभर्तुर्हिम्पेरम्पेषमरवेचतुरवि

१९ 19 रचितेभल्लसाशालाविशाले एकद्वित्र्यादियुक्त्यामधुरकटुकषायाम्लकक्षारतिक्तैरेकस्मि
न्षड्रसैः स्युर्गणक कति वद व्यंजने व्यक्तिभेदाः २२ मूषान्यासः ८/१ ७/२ ६/३ ५/४ ४/५ ३/६ २/७ १/८ त
था एकद्व्यादिमूषावहनसंख्याः ८/१ २८/२ ५६/३ ७०/४ ५६/५ २८/६ ८/७ ८ एवमष्टमूषेराजगृहे
वहनभेदा एक्यमेषां २५५ द्वितीयोदाहरणे व्यंजनसंख्या ६४ छंदोवन्न्यासः अथश्रे
ढीव्यवहारे करणसूत्रं सैकपदघ्नपदार्धमथैकाद्यंकयुतिः किल संकलिताख्या सा
द्वियुतेनपदेनविनिघ्नास्यात्त्रिहृता किल संकलितैक्यं १ उद्देशकः एकादीनां नवांतानां
पृथक्संकलितानिमे तेषांसंकलितैक्यानि प्रचक्ष्व गणक द्रुतं २ न्यासः १।२।३।४।५।६।७।८।९
तथान्येषां संकलितानि १।३।६।१०।१५।२१।२८।३६।४५ एषामेक्यानि १।४।१०।२०।३५।५६।८४।१२०।१६५

१९

द्विघ्नपदं कुयुतं त्रिविभक्तं संकलितेन हतं कृतियोगः संकलितस्य कृतेः सममेकाद्यं
कघनैक्यमुदाहृतमाद्यैः ३ न्यासः उद्देशकः तेषामेव च वर्गैक्यं घनैक्यं च वद द्रुतं यदि
संकलनामार्गे कुशला भवतो मतिः ४ न्यासः १।२।३।४।५।६।७।८।९ लब्धमेषां वर्गैक्यं
२८५ घनैक्यं २०२५ सूत्रं व्येकपदघ्नचयो मुखयुक्स्यादंत्यधनं मुखयुग्दलितं तत् मध्य
धनं पदसंगुणितं तत्सर्वधनं गुणितं च तदेतत् ५ न्यासः अत्रोद्देशकः आद्ये दिने द्र
म्मचतुष्टयं यो दत्वा द्विजेभ्योनुदिनं प्रवृत्तः दातुं सखे पंचचयेन पक्षे द्रम्मान्वद द्राक्कु क
ति तेन दत्ताः ६ न्यासः आदि ४ उत्तर ५ गछ १५ आदिधनं ३९ अंत्यधनं ७४ सर्वधनं ५८५
उदाहरणं आदिः सप्त चयः पंच गच्छोष्टौ यत्र तत्र मे मध्यांत्यधनसंख्यां वद सर्वधनं

२० चकिं ७ आदि ७ चयः ५ गछ ८ सर्वधनं १९६ अंत्यधनं ४२ अत्र समदिने गछमध्यदिनाभावा
न्मध्यात्पागपरदिनधनयोर्योगार्द्धं मध्यदिनं भवितुमर्हतीति प्रतीतिरुत्पाद्या आदिलाभा
यसूत्रं गछहृते वदनं गणिते स्यादथ व्येकपदघ्नचयार्द्धविहीने उद्देशकः पंचाधिकं शतं श्रे
ढीफलं सप्तपदं किल चयं त्रयं वयं विद्मो वदनं वद नंदन ८ न्यासः आदि ० उत्तर ३ गछ ७
गणितं १०५ लब्धमादि ६ चयज्ञानार्थं सूत्रं गछहृतं धनमादिविहीनं व्येकपदार्द्धहृतं च च
यः स्यात् ८ उद्देशकः प्रथममगमदह्ना योजने यो जनेशस्तदनु ननु कयासौ ब्रूहि या
ताध्ववृद्ध्या अरिकरिहरणार्थं योजनानामशीत्या रिपुनगरमवाप्तः सप्तरात्रेण धीम
न् ९० न्यासः आदि २ गछ ७ गणितं ८० लब्धमुत्तरं ३ १/७ गछज्ञानाय सूत्रं श्रेढीक २०